# Shri Bala Muktavali Stotram

# શ્રીબાલામુક્તાવલીસ્તોત્રમ્

## Document Information

Text title : Shri Bala Muktavali Stotram

File name : bAlAmuktAvalIstotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 31, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# શ્રીબાલામુક્તાવલીસ્તોત્રમ્

બાલાર્કકોટિરુચિરાં કોટિબ્રહ્માણ્ડભૂષિતામ્ ।
કન્દર્પકોટિલાવણ્યાં બાલાં વન્દે શિવપ્રિયામ્ ॥ ૧॥

વહ્નિકોટિપ્રભાં સૂક્ષ્માં કોટિકોટિસહેલિનીમ્ ।
વરદાં રક્તવર્ણાં ચ બાલાં વન્દે સનાતનીમ્ ॥ ૨॥

જ્ઞાનરત્નાકરાં ભીમાં પરબ્રહ્માવતારિણીમ્ ।
પઞ્ચપ્રેતાસનગતાં બાલાં વન્દે ગુહાશયામ્ ॥ ૩॥

પરાપ્રાસાદમૂર્ધ્નિસ્થાં પવિત્રાં પાત્રધારિણીમ્ ।
પશુપાશચ્છિદાં તીક્ષ્ણાં બાલાં વન્દે શિવાસનામ્ ॥ ૪॥

ગિરિજાં ગિરિમધ્યસ્થાં ગીઃ રૂપાં જ્ઞાનદાયિનીમ્ ।
ગુહ્યતત્ત્વપરાં ચાદ્યાં બાલાં વન્દે પુરાતનિમ્ ॥ ૫॥

બૌદ્ધકોટિસુસૌન્દર્યાં ચન્દ્રકોટિસુશીતલામ્ ।
આશાવાસાં પરાં દેવીં વન્દે બાલાં કપર્દિનીમ્ ॥ ૬॥

સૃષ્ટિસ્થિત્યન્તકારિણીં ત્રિગુણાત્મકરૂપિણીમ્ ।
કાલગ્રસનસામર્થ્યાં બાલાં વન્દે ફલપ્રદામ્ ॥ ૭॥

યજ્ઞાનાશીં યજ્ઞદેહાં યજ્ઞકર્મશુભપ્રદામ્ ।
જીવાત્મવિશ્વજનનીં બાલાં વન્દે પરાત્પરામ્ ॥ ૮॥

ઇત્યેતત્પરમં ગુહ્યં નામ્ના મુક્તાવલીસ્તવમ્ ।
યે પઠન્તિ મહેશાનિ ફલં વક્તું ન શક્યતે ॥ ૯॥

ગુહ્યાદ્ગુહ્યતરં ગુહ્યં મહાગુહ્યં વરાનને ।
વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ્ ॥ ૧૦॥

કન્યાર્થી લભતે કન્યાં મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ।
બહુનાત્ર કિમુક્તેન ચિન્તામણિરિવાપરમ્ ॥ ૧૧॥

ગોપનીયં પ્રયત્નેન ગોપનીયં ન સંશયઃ ।
અન્યેભ્યો નૈવ દાતવ્યં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૧૨॥

ઇતિ શ્રીવિષ્ણુયામલે શ્રીબાલામુક્તાવલીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Muktavali Stotram*
pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*